# संस्कृत वार्ता:

दिनाङ्क : 04.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ली-नगरे वेनेजुएलादेशस्य कार्यवाहकराष्ट्रपतिना डेल्सी रोड्रिग्ज-महाभागया सह द्विपक्षीयवार्तां कृतवान्।
- वयोवृद्धः चलचित्रनिर्माता तथा केन्द्रीयचलचित्रप्रमाणनमण्डलस्य पूर्वाध्यक्षः पहलाज निहलानी अद्य मुम्बईनगरे दिवंगतः।
- अमरीकादेशस्य प्रतिनिधिसभा राष्ट्रपतिं डॉनल्ड ट्रम्पम् ईरानदेशम् विरुध्य अग्रिमसैन्यकार्याचरणात् निरोद्धुं प्रस्तावं स्व्यकरोत् ।
- भारतीय-ऋतु-विभागेन अद्य केरलराज्ये दक्षिण-पश्चिम-प्रावृडः आगमनस्य पुष्टिः कृता।
- गुजरातस्य अहमदाबाद-नगरे विश्व-योगासन-क्रीडा- स्पर्धाश्रृंखला इत्यस्य उद्घाटन-संस्करणस्य आरम्भः अभवत्, यत् वैश्विक-क्रीडा-मार्गसूच्यां ऐतिहासिकं सोपानं निर्दिशति।

---------------------------------

<u>पीएम-वेनेजुएला वार्ता</u>

प्रधानमन्त्री नरेन्द्रमोदी वेनेजुएलादेशस्य कार्यवाहकराष्ट्रपतिना डेल्सी रोड्रिग्ज-महाभागया सह द्विपक्षीयवार्तां कृतवान् । प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ली-नगरे वेनेजुएलादेशस्य कार्यवाहकराष्ट्रपतिना डेल्सी रोड्रिग्ज-महाभागया सह द्विपक्षीयवार्तां कृतवान्। उभाभ्यां नेतृभ्यां भारत-वेनेजुएला-सम्बन्धानां विविधपक्षाः समीक्षिताः। ऊर्जा-सुरक्षा, व्यापार-निवेशः, औषधिनिर्माणम्, स्वास्थ्यसेवा, परिवहनम् तथा नवीकरणीय-ऊर्जाक्षेत्रेषु सहयोगविस्तारस्य उपायाश्च चर्चिताः। वार्ताहरान् संबोधयन् रुदेन्द्रटण्डन: प्रोक्तवान् यत् द्विपक्षीयवार्ता: उभ्यो: देशयो: संबंधम् सुदृढीकरोति।

डेल्सी रोड्रिग्ज-महाभागा पञ्चदिवसीय-भारतयात्रायै ह्यः नवदिल्लीम् आगता। तया सह विदेशमन्त्रालयस्य, अर्थव्यवस्था-वित्तमन्त्रालयस्य, विज्ञान-प्रौद्योगिकीमन्त्रालयस्य तथा परिवहनमन्त्रालयस्य मन्त्रिणः समाविश्यमानानाम् उच्चस्तरीयं प्रतिनिधिमण्डलमपि आगतम्। अस्याः यात्रायाः माध्यमेन उभयोः देशयोः आर्थिक-ऊर्जा-क्षेत्रयोः सहयोगः अधिक: सुदृढः भविष्यतीति अपेक्ष्यते।

-----------------------------------

<u>विदेशमन्त्री एस्. जयशङ्करः</u>

विदेशमन्त्री एस्. जयशङ्करः वेनेजुएलादेशस्य कार्यवाहकराष्ट्रपतिना डेल्सी रोड्रिग्ज् महोदयया सह सममिलत्, द्विपक्षीयसहयोगस्य सुदृढीकरणे प्रदत्तम् बलम्।

नवदिल्ल्यां विदेशमन्त्री एस्. जयशङ्करः अद्य प्रातःकाले वेनेजुएलादेशस्य कार्यवाहकराष्ट्रपतिना डेल्सी रोड्रिग्ज् महोदयया सह सममिलत्। अस्मिन् अवसरे उभयोः देशयोः सम्बन्धानां सुदृढीकरणं विविधक्षेत्रेषु सहकारविस्तारश्च चर्चितः।

सामाजिकान्तर्जाले प्रकाशिते संदेशे डॉ. जयशङ्करेण उक्तं यत् भारतं भारत-वेनेजुएला-सम्बन्धान् प्रति डेल्सी रोड्रिग्ज् महोदयायाः दीर्घकालिकप्रतिबद्धतायाः सम्मानं करोति। तेनोक्तं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सह तस्याः मेलनेन उभयोः देशयोः संबन्धः अधिकं सुदृढः भविष्यति। विदेशमन्त्रिणा आशा प्रकटिता यत् ऊर्जा-वाणिज्यादिक्षेत्रेषु भारत-वेनेजुएलादेशयोः सहभागित्वम् आगामिषु कालेषु अधिकं विस्तरिष्यते।

-----------------------------------

<u>पहलाज-निहलानी-निधनम्</u>

वयोवृद्धः चलचित्रनिर्माता तथा केन्द्रीयचलचित्रप्रमाणनमण्डलस्य पूर्वाध्यक्षः पहलाज निहलानी अद्य मुम्बईनगरे दिवंगतः। सः षट्सप्ततिवर्षीयः आसीत्। चलचित्रनिर्मातृत्वेन असौ 'हाथकड़ी' इति चलचित्रेण स्वकार्यजीवनस्य आरम्भम् कृतवान् । 'इल्ज़ाम' इति

चलचित्रेण अभिनेत्रे गोविन्दाय प्रमुखावसरप्रदानस्य श्रेयः अपि तस्मै वर्तते। पंचदशोत्तरद्विसहस्र तमे वर्षे सः केन्द्रीयचलच्चित्रप्रमाणनमण्डलस्य अध्यक्षः नियुक्तः।

-----------------------------------

**<u>अमरीका-युद्ध प्रस्ताव</u>**

अमरीकादेशस्य प्रतिनिधिसभा राष्ट्रपतिं डॉनल्ड ट्रम्पम् ईरानदेशम् विरुध्य अग्रिमसैन्यकार्याचरणात् निरोद्धुं प्रस्तावं स्व्यकरोत् । एषः चतुर्थः अवसरः अस्ति यदा प्रतिनिधिसभा ताभिः युद्धसम्बद्धाभिः शक्तिभिः सीमिता भवेत् इत्यर्थं प्रयासं करोति। आलोचकानाम् अनुसारेण ईरानविरोधे सैन्यकार्याय संसदः अनुमोदनम् आवश्यकम् अस्ति।

-----------------------------------

**<u>केरलराज्ये वायव्य -वर्षर्तोः आगमनम्</u>**

भारतीय-ऋतु-विभागेन अद्य केरलराज्ये दक्षिण-पश्चिम-प्रावृडः आगमनस्य पुष्टिः कृता। अस्मिन् वर्षे वर्षर्तोः वृष्टिः सामान्यकालात् त्रिदिवस-विलम्बेन आगता। विभागेन नवम- जून-दिनाङ्कपर्यन्तं केरलराज्ये माहे-क्षेत्रे च कतिपयेषु स्थानेषु अतिवृष्टेः सम्भावना प्रकटिता। अस्माकं वार्ताहरानुसारं राज्यस्य विविधेषु जनपदेषु तीव्रा वर्षा प्रवर्तते, येन जनजीवनम् प्रभावितम् अस्ति।

-----------------------------------

**<u>पी. एम.-योगासनः</u>**

गुजरातस्य अहमदाबाद-नगरे विश्व-योगासन-क्रीडा- स्पर्धाश्रृंखला इत्यस्य उद्घाटन-संस्करणस्य आरम्भः अभवत्। इदम् वैश्विक-क्रीडा-मार्गसूच्यां ऐतिहासिकं सोपानं निर्दिशति। प्रधानमन्त्री नरेन्द्रमोदी सायङ्काले अन्तर्जाल-माध्यमेन अस्मिन् महा-कार्यक्रमे भागम्

गृहीतवान्। स्वस्य शुभाशयाः निवेदयति, यतः जगतः योगानुरागिण: क्रीडकाः च प्रतियोगितायाः कृते समागच्छन्ति। "इति।

-----------------------------------

## राष्ट्रपति-लाओस

भारत-लाओस-सम्बन्धविषये राष्ट्रपतिना द्वयोर्देशयोः सहयोगविस्तारस्य सम्भावनाः प्रतिपादिताः। राष्ट्रपतिः द्रौपदी मुर्मुः उक्तवती यत् भारतस्य लाओ-जनवादी-लोकतान्त्रिक-गणराज्यस्य च मध्ये बौद्धधर्मस्य-रामायणस्य च विषयाधारिताः घनिष्ठाः सांस्कृतिक-सभ्यतागत-सम्बन्धाः सन्ति। राष्ट्रपतिभवने लाओस्देशस्य उपप्रधानमन्त्रिणं विदेशमन्त्रिणं च **थोंगसावन फोमविहाने** इत्यमूं स्वागतं कुर्वन्ती सा अवदत् यत् उभौ देशौ अस्मिन् वर्षे राजनयिक-सम्बन्धानां स्थापनायाः सप्ततितमवर्षम् समाचरतः। सा उक्तवती यत् व्यापार-निवेशयोः क्षेत्रे सहयोगविस्तारस्य पर्याप्ताः अवसराः सन्ति। सूचना-प्रौद्योगिकी, स्वास्थ्यं, कृषिः, सिञ्चनम्, विनिर्माणम्, नवीकरणीय-ऊर्जा तथा विद्युत्-क्षेत्रेषु सहयोगवर्धनाय भारतं सज्जम् अस्ति। पूर्व विदेशमन्त्री एस् जयशंकरः अपि लाओसदेशस्य उपप्रधानमन्त्रिणा सह अमिलत्।

-----------------------------------

## रिजिजू-परिस्कारोत्सव

अल्पसंख्यक कार्य मन्त्री किरेन रिजिजू अद्य न्यगादीत् यत् शासनव्यवस्थां भद्रतरं कर्तुं कल्याणकारिणीनां योजनानां प्रभाविनं क्रियान्वयनं सुनिश्चयं कर्तुं प्रविधिना महत्वपूर्णा भूमिका निर्वहिता। असौ अल्पसंख्यक-कार्यमन्त्रालय द्वारा अद्य नवदिल्ल्यां आयोजितानां परिष्काराणां द्वादशवर्षप्रपूर्त्यवसरस्य उपलक्ष्ये मन्यमानं परिष्कारोत्सवं सम्बोधयन्नुक्तवान्।

-----------------------------------

## मेरा युवा भारत

मेरा-युवाभारत इतीदं आधिकारिकरूपेण गीनिस-वर्ल्ड-रिकार्ड्स इत्यनेन मान्यता प्राप्ता, यतोहि एकसप्ताहे आंतर्जाल-प्रश्न इत्यस्य कृते सर्वाधिकानां उपयोक्तृणां उपाधिं प्राप्तवत्, यत्र प्रश्नानां अभासीय रूपेण उत्तरं प्रयच्छन्त: त्रिलक्षनवतिसहस्रात् अधिकाः प्रतिभागिनः आसन्। केन्द्रीय-युव-कार्य-क्रीडामन्त्री डा. मनसुख माण्डवीयः अद्य नवदेहली-नगरे आयोजिते समारोहे सम्मानपत्रम् अवाप्नोत्। गतवर्षे अक्टूबर-मासस्य पञ्चविंशति दिनाङ्कात् एकत्रिंशत दिनाङ्कपर्यन्तं विकसित-भारत-यंग-लीडर्स-डयलाग-षड्विंशत्युत्तरद्विसहस्रम् प्रश्न इत्यस्य माध्यमेन अभिलेखः प्राप्तः।

-----------------------------------

<u>गुजरात - पुलिस ऑपरेशन</u>

गुजरात-आरक्षि-विभागेन राज्ये अवैधरूपेण निवसत: बाङ्ग्लादेशीय-नागरिकान् विरुध्य 'ऑपरेशन डेल्टा हण्ट' नाम्ना विशेष-अभियानम् प्रारब्धम्। अस्य अभियानस्य अन्तर्गतं गत-चतुर्विंशति- होरासु चर्तुविंशतधिक:चतुष्शतं बाङ्ग्लादेशीयाः गृहीताः, तथा च द्विअशीतिअधिक: सप्तशतं अधिक-सन्दिग्ध-जनानां विषये अन्वेषणं प्रचलति। उपमुख्यमन्त्री गृहमन्त्री च हर्ष संघवी उक्तवान् यत् राज्यस्य सुरक्षायै संकटकारिणः सर्वान् अनधिकृतोपवेशिनः चिन्हीकृत्य तेषां विरोधे वैधानिकम् क्रियान्वयनं विधास्यते, तान् स्वदेशं प्रेषयिष्यन्ति च। अवैधप्रवासिभ्यः आश्रयं साहाय्यं वा प्रदातृभ्यः अपि कठोर- क्रियान्वयनं प्रदास्यते।

-----------------------------------

<u>दिल्ली-अग्निकाण्डः</u>

दिल्लीमुख्यमन्त्री रेखा गुप्ता अद्य मालवीयनगर-अग्निकाण्डेन आहतान् द्रष्टुं साकेतस्थम् निजीचिकित्सालयं गतवती। सा पीडितैः तथा तेषां परिवारजनैश्च सह संवादम् कृतवती । प्रत्येकम् मृतकस्य परिवाराय दश-लक्ष-रूप्यकाणां, गम्भीररूपेण आहतेभ्यः पञ्च-लक्ष-रूप्यकाणां च अनुग्रहधनस्य घोषणा कृता। ज्ञातव्यं यत्, मालवीयनगरस्थिते वसतिगृहे अग्निकाण्डे एकविंशतिः जनाः मृताः।

-----------------------------------

<u>मुजफ्फरपुरनगर-आग</u>

बिहारराज्यस्य मुजफ्फरपुरनगरे एकस्मिन् निजीचिकित्सालये भीषणाग्निकाण्डे त्रयः जनाः मृताः, अनेके च आहताः। एषा घटना गत-रात्रौ ब्रह्मपुरा-क्षेत्रे अभवत्। गम्भीररोगिणः उपचारार्थं अन्येषु चिकित्सालयेषु प्रविष्टाः। प्रशासनम् घटनायाः अन्वेषणं करोति ।

।। इति वार्ता: ।।